International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(4): 27-29
© 2022 IJSR
www.anantaajournal.com
Received: 18-04-2022
Accepted: 26-05-2022

**सौरभ राय**
शोधछात्र, श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय, नई दिल्ली, भारत

**Corresponding Author:**
**सौरभ राय**
शोधछात्र, श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय, नई दिल्ली, भारत

# काले काले अभिसारः

## सौरभ राय

## प्रस्तावना

"रतिसुखसारे गतमभिसारे मदनमनोहरवेषम् ।
न कुरू नितम्बिनि ! गमनविलम्बनमनुसर तं हृदयेशम् ।।" [1]

भारतीय समाजसंस्कृतेश्च मूले विद्यते धर्म-अर्थ-काम-मोक्षः इति चतुवर्गः। भारतीयसमाजव्यवस्थायाः तथा भारतीयनाम् आचारे व्यवहारे च चतुर्वगस्य प्रभावः लक्ष्यते। तेषां विकाशः विस्तृतिश्च मूलरूपेण चतुर्वर्गकेन्द्रिकः । एतेन कारणवशात् सम्भवतः भारतीयजनाः अद्यावधि चतुर्वर्गस्य पालनं किरन्ति। कामः चतुर्वर्गस्य अन्यतमः अस्ति । कलिकाले कामस्य प्रभावं प्रवलरूपे दुरीदृश्यते । कामस्य प्रभावहेतुः मनुष्यव्यवहारे विविधावस्था परिलक्ष्यते । काव्य समाजस्य दर्पण इति कथ्यते । समाजस्य सूक्षातिसूक्षविषयम् अपि कविः तस्य काव्ये प्रकाशयति । अभिसारः अस्ति समाजस्य एकः सूक्ष्मः विषयः। यस्य उपस्थिति संस्कृतकाव्य-नाटकादि ग्रन्थे शास्त्रे च पाठकैः सहजतया अनुभूयते।

कामस्य प्रभावे मानवानां मध्ये यानि अवस्थानि परिलक्ष्यन्ते । तेषां मध्ये विपरीतलिङ्गं प्रति आकर्षणम् अन्यतमम् । मानवेतरप्राणीनां मध्ये अपि गुणः अयं परिलक्ष्यते । एतद् स्वाभाविकः नियमो अस्ति । एतेन संसारे सृष्टिप्रक्रिया सम्भवति। प्रियजनं प्रति प्रवलाकर्षणात् मिलनेच्छायाः हेतुः अभिसारः जन्मं लभेते।

**अभिसारः एवं अभिसारिका परिचयम्** – मूलतः नाट्यशास्त्रे नायिकाभेदप्रसङ्गे 'अभिसारिका' इति शब्दस्य प्रथमोच्चारणं प्राप्यते। नाट्यशास्त्रे भरतमुनिना अष्टप्रकारनायिकाभेदः दर्शयते। तत्र क्रमानुसारे अष्टमभेदः अभिसारिका वर्तते। "अभिसरति इति अभिसारः" – कमपि अभिमुखिकृत्य वा मिलनेच्छाय निर्द्दिष्टस्थाने लोकानाम् अज्ञातसारे निःशब्देन अभिसरणं गमनं वा अभिसारः इति कथ्यते। या नायिका नायकेन सह मिलनेच्छाय निर्द्दिष्टस्थाने संकेतस्थाने वा गच्छति सा अभिसारिका।

[1] गीतगोविन्दकाव्यम्, श्लोकसंख्या- ५.१

*नाट्यशास्त्रस्य प्रामाणिकम् साहित्यदर्पणे अभिसारिकायाः संज्ञा निरुपणप्रसङ्गे कविराजेन विश्वनाथेन उक्तम् –

"अभिसारयते कान्तं या मन्मथवशं वदा ।।
स्वयं वापि सारत्येषा धीरैरुक्ताभिसारिका ।।"[2]

या स्त्री कामेन वशवर्त्या (मदनायत्ता) सती वल्लभम् आत्मनः अभिमुखं याति सा अभिसारिका उक्ता।[3]
अभिसारणात् अभिसरणात् चेति द्विविधा अभिसारिका। अभिसरणकाले अभिसारिकायाः वेशभूषा-चलनादि विषये अपि चर्चा साहित्यदर्पणे अस्ति। यदि कुलजा स्त्री अभिसरेत् तर्हि सा भीतमृगवत् आत्मनः गात्रं यथासम्भवं संकुचिता, आभूषणानां निःशब्दकृता, अवगुण्ठनेन आवृता याति। वेश्या नानावर्णयुक्त-भास्वरवसनपरिहिता, शब्दायमानहस्तपादादि भूषणियुक्ता आनन्देन उद्भासितवदनेन याति। प्रेष्या तथा दासी वा यदि अभिसरेत् तदा तस्याः संलापः मदमत्ततया विकृतः, लोचनः विलासेन उत्फुल्लः च, तथा गतिः उद्धतया पादसञ्चारः लक्ष्यते। अत्यन्तकामातुरः इति भावः। अष्टप्रकाराः अभिसारस्थानानि अपि आचार्यैः निर्देशितम्। क्षेत्रं, वाढी, भग्नदेवालयः, दूतीगृहं, वनं, मालापञ्चः, श्मशानं, नद्यादीनां तटी च अथवा अन्धकाराच्छन्ननिर्जनस्थानानि अभिसरणयोग्यरूपेण विवेच्यते।

**संस्कृतग्रन्थेषु अभिसारः –** संस्कृतसाहित्ये प्रायशः अभिसारविषये काव्यनाटके वर्णना परिलक्ष्यते। संस्कृतकाव्यशास्त्रे नाट्यशास्त्रे च अभिसारः अभिसरिका च विषये लक्षणम् अपि निरुप्यते। तद् विषये स्थान-वेशभूषा-आभरणादि व्यापाराण् अपि साहित्यशास्त्रकारैः स्वकीये ग्रन्थे आलोचना क्रियते। भरतमुनिना अष्टनायिकाभेदप्रसङ्गे नाट्यशास्त्रे प्रथमम् अभिसारिकायाः वर्णना क्रियते।
स्वकीये दशरूपके धनञ्जयेनापि नायिकाभेदे अभिसारिका आलोच्यते। कविराजेन विश्वनाथेनापि समानपन्थाया अभिसारिकाम् आलोच्यते। भोजराजेन शृङ्गारप्रकाशे, सागरनन्दीना नाटकलक्षणरत्नकोशे, सागरतनयेन भावप्रकाशने अभिसारिकायाः आलोचना क्रियते।
काव्यशास्त्रीय ग्रन्थानां मध्ये रस-ध्वनि-अलंकार-रीति-गुणादिविषयणाम् अवबोधाय येषु उदाहरणानि प्रयुज्यते तेषु उदाहरणेषु अन्यतमः अभिसारविषयरूपेण विवेच्यते। काव्यालंकार-ध्वन्यालोक-काव्यप्रकाशादि अलंकाराशास्त्रीयग्रन्थे अभिसारविषयकश्लोकाः लक्ष्यते।
संस्कृतकाव्यानां मध्ये मेघदूतम् इति काव्ये मेघम् अभिसारिकानाम् अन्धकारे पथदर्शयितुम् आदिश्यते, किन्तु गर्जतुं निषेधयति, गर्जनेन अभिसारिकाणां मध्ये भीति उत्पद्यते, ताः भयाकृष्टस्वभावाः। मालविकाग्निमित्रम् नाटके नायक-नायिकायाः गोपनप्रणयं साक्षात्कारश्च। अमरुशतके अभिसारस्तथा अभिसारिकाविषये श्लोकस्य कार्पण्यं नास्ति। हालस्य 'गाथाशप्तशती' ग्रन्थेऽपि अभिसारविषयकं श्लोकवाहुल्यं परिलक्ष्यते। साहित्यशास्त्रे अभिसारिकायाः वर्णना आलोचनाप्रसङ्गे च उक्तौ ग्रन्थद्वयात् अनेकश्लोकम् आहृत्य उदाहरणं प्रस्तुयते। माघस्य शिशुपालवधे, भासस्य नाटके, नाट्यकार श्रीहर्षस्य नाटके, करुणरसोत्तीर्णनाट्यकारभवभूतेः नाटके अभिसारिका अभिसारश्च विषये श्लोकः विद्यते। शृङ्गारतिलके, सोमदेवस्य कथासरित्सागरे, सोड्ढलस्य उदयनसुन्दरीकथायाम्, जैनकविधनपालस्य रचनायाम्, आर्यासप्तशत्याम्, गुणाढ्यस्य वृहत्कथायाम्, भर्तृहरेः शृङ्गारशतके, जयदेवस्य गीतगोविन्दे इत्यादिषु ग्रन्थेषु अभिसारः विद्यमान अस्ति। दामोदरस्य कुट्टनीमतमे, पञ्चसायकादि कामशास्त्रे अभिसारिकायाः वर्णनाम् अस्ति।

**वर्तमानसमाजे अभिसारः –** यद्यपि अधुनापि अभिसारस्य मूलभावः अपरिवर्तितः अस्ति, तथापि समयेन सह किञ्चित् परिवर्तितम् अपि दृश्यते। अधुना अभिसारहेतुः नायिका केवलं रात्रौ अपेक्षां न कुरुते। दिवालोके सन्ध्याकाले रात्रौ च अभिसाराय गच्छति। अभिसारस्य स्थानाम् इदानीं न निर्दिष्टम् अस्ति। अधुना जनपूर्णं स्थानमपि प्रियेन सह साक्षात्काराय विवेच्यते। वर्तमानस्य प्रेमिकयुगलेन हट्टम्, पुरोद्यानं, यानप्रतीक्षालयः, चलचित्रगृहं, वृहदापनम्(shoping mall) आदि एकम् अपरेन सह मिलनस्थानरुपेण विवेच्यते। कदाचिद् समयः महाविद्यालय-विश्वविद्यालयप्राङ्गणोऽपि प्रेमिकयुगलस्य साक्षात्कारक्षेत्ररूपेण कार्यं करोति। अधुनासमाजे अभिभावकेषु प्रेमिक-प्रेमिकायाः स्वेच्छाय मिलनविषये कठोरता ह्रासमानं लक्ष्यते। अधुनापि अभिसारणकाले अभिसारिकायाः मनसि स्वपरिचयप्रकाशविषये भयं दृश्यते तथापि न तु पूर्वकालवत्। विद्यार्थिना "विद्यालयं गच्छामि" इति उक्ता प्रियेन सह साक्षात्काराय मेलनाय च गच्छति।
पूर्वे योगायोगस्य माध्यमः सीमितम् अस्ति स्मः। इत्यनेन अभिसारः प्रियेन सह मेलनम् अत्यन्तम् प्रयोजनीयम् आसीत्। अधुना योगायोगक्षेत्रे प्रयुक्तिगतविस्तारहेतुः प्रियेन सह योगायोगस्य समस्या नास्ति। यानि कारणानि अवलम्व्य अभिसरणं भवति, तानि कारणानि वर्तमाने समाजस्य उन्मुक्तमानसिकतायाः अतः अधुना अभिसारस्य

[2] साहित्यदर्पणः, श्लोकसंख्या- ३.७६।
[3], आचार्यहरिदाससिद्धान्तवागीशकृत साहित्यदर्पणग्रन्थस्य कुसुमप्रतिभाटीकायाः (श्लोकसंख्या- ३.७६) अभिसारिकाव्याख्याप्रसङ्गे।

अधिकं प्रयोजनं नास्ति, नास्ति तु प्रयोजनम् अभिसारणम् अभिसरणम् च। किन्तु काम मानवव्यावहारस्य गुणः प्रयोजनं च अस्ति। अतः कामेन प्रभावे यः अभिसारः तस्य निरसनं सम्भवं नास्ति। अभिसारस्य प्रकृतिः परिवर्तनं सम्भवं किन्तु प्राचीनसमाजे मानवव्यवहारे च यः अभिसारः आसीत्, सः वर्तमाने अपि अस्ति, आगामिकालेऽपि भविष्यति इति मन्ये। प्राचीनभारतीयसमाजे अभिसारः अलिखिततया विद्यमानमासीत् किन्तु इशवीयाष्टादशाधिकद्विसहस्रवर्षे(२०१८) महामान्यसर्वोच्चन्यायालयेन परकीयाम् अभिसारञ्च पूर्णरूपे स्वीकृतिः दीयते। उन्मुक्तमानसिकतासम्पन्नभारतीयसमाजः गान्धर्वविवाहं तथा नारी-पुरुषस्य स्वाभाविकमिलनं सादरं स्वीकरोति, स्वीकरोति च अभिसारम्।

### ग्रन्थसूची


1. अग्रवाल, मदनमोहन(सं), भावप्रकाशनम्, चौखाम्बा सुरभारती प्रकाशनी, वाराणसी, २०१२.
2. भोजराजः, द्विवेदी रेवाप्रसाद(सं), द्विवेदी सदाशिवकुमारी(सं), शृङ्गारप्रकाशः (द्वितीयः भागः), इन्दिरागान्धिराष्ट्रियकलाकेद्रम्, कलाकेन्द्रम्, / कालिदास संस्थानम्, वाराणसी, २००८.
3. धनञ्जयः, उपाध्यायः रामजी(सं), दशरूपकम्, भारतीय विद्या संस्थानम्, वाराणसी, २०००.
4. (४) विश्वनाथ कविराजः, पराशरः योगेश्वरशर्मा(सं), साहित्यदर्पणः(प्रथमः भागः), नाग पावलिशार्स, दिल्ली, १९९९.
5. मम्मटः, सिंह ड.सत्यव्रतः(सं), काव्यप्रकाशः, चौखाम्भा विद्याभवन, वाराणसी, २०१६.
6. कालिदास महाकवि, उप्रेती पं थानेशचन्द्र, मेघदूतम्, परिमल पाब्लिकेशन, देल्ली, २०१९.
7. मुनि भरत, शास्त्री मधुसूदन(सं), नाट्यशास्त्रम्, काशीहिन्दुविश्वविद्यालयः, वाराणसी, १९७१.
8. सागरनन्दी, शास्त्री बावुलालशुक्लः, नाटकलक्षणरत्नकोशः, चोखाम्बा भारती अकादेमी, वाराणसी, १९७२.
9. जयदेव, द्विवेदी शिवप्रसाद(सं), गीतगोविन्दकाव्यम्, संस्कृत सुरभारती प्रकाशन, वाराणसी, २०१५.